# प्रथमः पाठः

# तपोवने ब्रह्मचारी

{प्रस्तुत पाठ भासरचित 'स्वप्नवासवदत्त' नाटक के प्रथम अंक से संकलित है। भास उपलब्ध संस्कृत साहित्य में कालगत दृष्टि से प्राचीनतम नाट्यकृतियों के रचयिता हैं। प्रस्तुत नाट्यांश का दृश्य राजगृह के परिसर का है जहाँ राजमाता से मिलने के लिए मगध राजकुमारी पद्मावती आती है। वहीं प्रच्छन्न वेश में वत्सराज का मन्त्री यौगन्धरायण उस राज्य के राजा उदयन की रानी वासवदत्ता को अपनी स्वसा के रूप में ले आता है तथा पद्मावती के पास न्यास–रूप में रख देता है। मन्त्री यौगन्धरायण एक योजना के अन्तर्गत कार्य कर रहा था। इसलिए उसी राज्य के एक ग्राम में स्थित पाठशाला का ब्रह्मचारी जब आता है, तो वह इन लोगों की कई जिज्ञासाओं का समाधान कर देता है। इस दृश्य का नाटकीय महत्त्व बहुत अधिक है।}

(ततः प्रविशति ब्रह्मचारी)

**ब्रह्मचारी –** (ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः। दृढमस्मि परिश्रान्तः। अथ कस्मिन् प्रदेशे विश्रमयिष्ये ? (परिक्रम्य) भवतु दृष्टम्। अभितस्तपोवनेन भवितव्यम्। तथाहि –

**विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः**
**वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।**

**भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो**
**निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः।।**

यावत्प्रविशामि । (प्रविश्य) अये! आश्रमविरुद्धः खल्वेष जनः।(अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र। निर्दोषमुपसर्पणम्। अये! स्त्रीजनः।

**काञ्चुकीयः –** स्वैरं स्वैरं प्रविशतु भवान्। सर्वजनसाधारणमाश्रमपदं नाम।

**वासवदत्ता –** आम्।

**पद्मावती –** अम्मो ! परपुरुषदर्शनं परिहरत्यार्या। भवतु, सुपरिपालनीयः खलु मन्न्यासः।

**काञ्चुकीयः –** भो :! पूर्वं प्रविष्टाः स्मः । प्रतिगृह्यतामतिथिसत्कारः।

**ब्रह्मचारी –** (आचम्य) भवतु भवतु। निवृत्तपरिश्रमोऽस्मि।

**यौगन्धरायणः–**भोः ! कुत आगम्यते, क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य।

**ब्रह्मचारी –** भोः ! श्रूयताम् । राजगृहतः आगतोऽस्मि। श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामः, तत्रोषितवानस्मि।

**वासवदत्ता –** (आत्मगतम्) हा लावाणकं नाम । लावाणकसंकीर्त्तनेन पुनर्नवीकृत इव मे सन्तापः।

**यौगन्धरायणः–**अथ परिसमाप्ता विद्या ?

**ब्रह्मचारी –** न खलु तावत्।

यौगन्धरायणः—यद्यनवसिता विद्या, किमागमनप्रयोजनम् ?

ब्रह्मचारी — तत्र खल्वतिदारुणं व्यसनं संवृत्तम्।

यौगन्धरायणः—कथमिव ?

ब्रह्मचारी — तत्रोदयनो नाम राजा प्रतिवसति।

यौगन्धरायणः—श्रूयते तत्रभवानुदयनः । किं सः ?

ब्रह्मचारी — तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल।

यौगन्धरायणः—भवितव्यम् । ततस्ततः ?

ब्रह्मचारी — ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा।

वासवदत्ता — (आत्मगतम्) अलीकम् अलीकं खलु एतत्। जीवामि मन्दभागा।

यौगन्धरायणः—ततस्ततः ?

ब्रह्मचारी — ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः।

यौगन्धरायणः—सत्यं पतित इति। ततस्ततः ?

ब्रह्मचारी — ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोग-जनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः।

वासवदत्ता — (आत्मगतम्) जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम्।

यौगन्धरायणः—ततस्ततः ?

ब्रह्मचारी – ततस्तस्याः शरीरोपमुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजा मोहमुपगतः।

सर्वे – हा !

वासवदत्ता – (स्वगतम्) सकाम इदानीमार्ययौगन्धरायणः भवतु।

चेटी – भर्तृदारिके ! रोदिति खलु इयम् आर्या।

पद्मावती – सानुक्रोशया भवितव्यम्।

यौगन्धरायणः– अथ किम् । अथ किम्। प्रकृत्या सानुक्रोशा मे भगिनी । ततस्ततः ?

ब्रह्मचारी – ततः शनैः शनैः प्रतिलब्धसंज्ञ : संवृत्त : ।

पद्मावती – दिष्ट्या ध्रियते । मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्।

यौगन्धरायणः–ततस्ततः ?

ब्रह्मचारी – ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते ! हा अवन्तिराजपुत्रि! हा प्रिये ! हा प्रियशिष्ये ! इति किमपि किमपि बहु प्रलपितवान्। किं बहुना –

**नैवेदानीं तादृशाश्चक्रवाका**
**नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः ।**
**धन्या सा स्त्री यां तथा वेत्ति भर्त्ता**
**भर्तृस्नेहात् सा हि दग्धाप्यदग्धा ।।**

## शब्दार्थाः

| | | |
|---|---|---|
| **प्रतिनिवृत्त** | परावर्तितः | लौटा हुआ |
| **अनुक्रोशः** | करुणा | दया |
| **उपभुक्तानि** | धृतानि | धारण किए गए |
| **आभरणानि** | आभूषणानि | आभूषणों को |
| **परिष्वज्य** | आलिङ्ग्य | आलिंगन करके |
| **उपगतः** | प्राप्त : | प्राप्त हुआ |
| **प्रकृत्या** | स्वभावेन | स्वभाव से |
| **दिष्ट्या** | भाग्येन | भाग्य से |
| **ध्रियते** | जीवति | अवस्थित हैं, जी रहे हैं |
| **महीतले** | भूतले | पृथ्वी पर |
| **परिसर्पणम्** | परिलुण्ठनम् | लोटना |
| **पांसवः** | रजांसि | धूलि–समूह |
| **पाटलम्** | रक्तवर्णम् | लाल रंग का |
| **संज्ञा** | चेतना | चेतना, होश |
| **इदानीम्** | अधुना | इस समय |
| **चक्रवाकाः** | कोकाः (पक्षिविशेषाः) | चकवा पक्षी |
| **वियुक्ताः** | विरहिताः | अलग, पृथक् |

| | | |
|---|---|---|
| **धन्या** | सौभाग्यवती | भाग्यवाली |
| **दग्धा** | भस्मीभूता | जली हुई |
| **स्नेहात्** | अनुरागात् | प्रेम से (प्रेम करता है) |
| **वेत्ति** | जानाति | जानता है |
| **अवलोक्य** | दृष्ट्वा | देखकर |
| **परिश्रान्तः** | क्लान्तः | थका हुआ |
| **परिक्रम्य** | परितो भूत्वा | घूम कर |
| **अभितः** | उभयतः | दोनों ओर |
| **प्रत्ययः** | विश्वासः | विश्वास |
| **विश्रब्धम्** | निःशङ्कम् | निर्भीक होकर |
| **अचकिताः** | निर्भयाः | निडर |
| **विटपाः** | शाखाः | डालियाँ |
| **भूयिष्ठम्** | बहुलतया | बहुत अधिक |
| **कपिलानि** | पिङ्गलवर्णाः | पीले रंग की |
| **स्वैरम्** | यथेच्छया | निःशंक भाव से |
| **न्यासः** | निक्षेपः | धरोहर |
| **आचम्य** | आचमनं कृत्वा | आचमन करके |
| **अधिष्ठानम्** | निवासस्थानम् | स्थान |
| **आत्मगतम्** | स्वगतम् | मन ही मंन |

| | | |
|---|---|---|
| **व्यसनम्** | विपत्ति | संकट |
| **प्रतिगृह्यताम्** | स्वीक्रियताम् | स्वीकार कीजिए |
| **क्व** | कुत्र | कहाँ |
| **भवितव्यम्** | सम्भाव्यम् | हो सकता है। |
| **मन्दभागा** | हतभागा | अभागिन |
| **अलीकम्** | असत्यम् | झूठ |
| **वारितः** | निवारितः | रोका गया |
| **अभ्यवपत्तुम्** | परित्रातुम् | बचाने के लिए |
| **निष्क्रान्तः** | निर्गतः | निकल गया |
| **सुपरिपालनीयः** | सुरक्षणीयः | आसानी से रक्षा करने योग्य |

## व्याकरणम्

**प्रविशति** = प्र + √विश् लट् लकार प्रथम पुरुष

**ऊर्ध्वमवलोक्य** = ऊर्ध्वम् + अवलोक्य

**अवलोक्य** = अव + √लोक् + ल्यप्

**अभितस्तपोवनेन** = अभितः + तपः + वनेन

**भवितव्यम्** = √भू + तव्यत्

**परपुरुषदर्शनम्** = परः पुरुषः परपुरुषः (कर्मधारय समास) तस्य दर्शनम्
(षष्ठी तत्पुरुष समास)

**मन्न्यासः** = मत् + न्यासः

**प्रतिगृह्यतामतिथिसत्कारः** = प्रतिगृह्यताम् + अतिथिसत्कारः

**निवृत्तपरिश्रमोऽस्मि** = निवृत्तपरिश्रमः + अस्मि। निवृत्तः परिश्रमो यस्य सः (बहुव्रीहिः)

**गन्तव्यम्** = √गम् + तव्यत्

**क्वाधिष्ठानमार्यस्य** = क्व + अधिष्ठानम् + आर्यस्य

**तत्रोषितवानस्मि** = तत्र + उषितवान् + अस्मि

**पुनर्नवीकृतः** = पुनः + नवीकृतः (नव + च्वि +√कृ + क्त )

**प्रतिगृह्यताम्** = प्रति + √ग्रह् + लोट् लकार (कर्मवाच्य)

**आचम्य** = आ + √चम् + ल्यप्

**यद्यनवसिता** = यदि + अनवसिता, (नञ् + अव + √सो + क्त +टाप्)

**मन्दभागा** = मन्दः भागः यस्याः सा (बहुव्रीहि समास)

**प्रतिनिवृत्तः** = प्रति + नि + √वृत् + क्तः

**परित्यक्तुकामः** = परित्यक्तुं कामः यस्य सः

**अभ्यवपत्तुम्** = अभि + अव + √पद् + तुमुन्

**तपस्विजनोऽप्यत्र** = तपस्विजनः + अपि + अत्र

**निष्क्रान्ताः** = निस् + √क्रम् + क्त

**ततस्तामभ्यवपत्तुकामः** = ततः + ताम् + अभि + अवपत्तुकामः

**जानाम्यार्यपुत्रस्य** = जानामि + आर्यपुत्रस्य

**सानुक्रोशत्वम्** = अनुक्रोशः तेन सह वर्त्तमानः सानुक्रोशः तस्य भावः।

**शरीरोपभुक्तानि** = शरीरेण उपभुक्तानि

**महीतलपरिसर्पणपांसुपाटलशरीरः** = महीतले परिसर्पणेन पांसुना पाटलं शरीरं यस्य।

**उत्थाय** = उत् + स्था + ल्यप्

**प्रतिलब्धसंज्ञः** = प्रति + √लभ् + क्त + टाप् = प्रतिलब्धा संज्ञा चेतना येन सः।

**नैवेदानीम्** = न + एव+ इदानीम्

**दग्धाप्यदग्धा** = दग्धा + अपि + अदग्धा

**निर्दोषमुपसर्पणम्** = निः + दोषम् + उपसर्पणम्

**परिहरत्यार्या** = परिहरति + आर्या

**सचिवस्तस्मिन्नेवाग्नौ** =सचिवः + तस्मिन् + एव + अग्नौ

**संवृत्तम्** = सम् + √वृत् + क्तः

**परिष्वज्य** = परि + √स्वञ्ज् + ल्यप्

## अभ्यास :

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–**

(क) अवन्तिराजपुत्री का आसीत् ?

(ख) ब्रह्मचारी कुतः आगतः ?

(ग) अचकिताः हरिणाः विश्रब्धं कुत्र चरन्ति?

(घ) लावाणकं नाम ग्रामः कुत्र आसीत् ?

(ङ) ग्रामदाहेन का दग्धा?

2. **पर्यायवाचिनां मेलनं कुरुत–**

| | |
|---|---|
| (क) अभितः | (i) विश्वासः |
| (ख) विटपाः | (ii) निर्गतः |
| (ग) अलीकम् | (iii) सदृशः |
| (घ) प्रत्ययः | (iv) रजांसि |
| (ङ) इव | (v) मन्त्री |
| (च) अवलोक्य | (vi) शाखाः |
| (छ) अमात्यः | (vii) हतभागा |
| (ज) निष्क्रान्तः | (viii) उभयतः |
| (झ) मन्दभागा | (ix) असत्यम् |
| (ञ) पांसवः | (x) दृष्ट्वा |

**3. निम्नलिखितानां शब्दानां वाक्येषु प्रयोगं कुरुत –**

(i) न्यासः (ii) विलोक्य (iii) वृक्षाः

(iv) अतिथिसत्कारः (v) इदानीम्

**4. निम्नलिखितानां शब्दानां प्रकृति–प्रत्यय–विभागं कुरुत–**

(i) अवलोक्य (ii) गन्तव्यम् (iii) उपगतः

(iv) स्नात्वा (v) कर्त्तव्यम्

**5. अधोलिखितानां शब्दानां रिक्तस्थानेषु प्रयोगं कुरुत –**

आगतः , व्यसनम्, प्रतिवसति, अलीकम्, निःशङ्कम , ब्रह्मचारी, सानुक्रोशत्वम्, शनैः–शनैः, श्रुत्वा, इदानीम्

(क) तत्र उदयनो नाम राजा ..........................।

(ख) तत्र खल्वतिदारुणं .......................... संवृत्तम्

(ग) .......................... मा वद।

(घ) सः पाटलिपुत्रात् ..........................।

(ङ) .......................... प्रविशतु भवान्।

(च) सः .......................... अस्ति।

(छ) सः ..........................खादति।

(ज) जानामि आर्यपुत्रस्य मयि ..........................।

(झ) .......................... वर्षा भवति।

(ञ) तस्य वचनं .......................... सः प्रसन्नः अभवत्।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्नाः विरच्यन्ताम्**

(क) तत्र उदयनो नाम राजा प्रतिवसति स्म।

(ख) सः राजगृहतः आगतः।

(ग) ग्रामदाहेन वासवदत्ता दग्धा।

(घ) हरिणाः विश्रब्धं चरन्ति।

(ङ) सर्वे वृक्षाः पुष्पफलैः समृद्धाः सन्ति।

(च) सा भर्तृस्नेहात् दग्धा अपि अदग्धा अस्ति।

(छ) उदयनः बहु प्रलपितवान्।

(ज) सा आर्यपुत्रस्य सानुक्रोशत्वं जानाति।

(झ) यौगन्धरायणः अपि अग्नौ पतितः।

(ञ) सः अलीकं वदति।

**7. सन्धिविच्छेदः क्रियताम्–**

(i) नैवेदानीम् (ii) दग्धाप्यदग्धा (iii) मन्न्यासः

(iv) आगतोऽस्मि (v) यद्यनवसिता (vi) तपस्विजनोऽप्यत्र.

**8. अधोलिखितेषु पदेषु प्रयुक्ताः धातवः पदस्य समक्षं लिख्यन्ताम्**

| पदम् | – | धातुः |
|---|---|---|
| (क) प्रविशामि | – | ................................ |
| (ख) अवलोक्य | – | ................................ |
| (ग) चरन्ति | – | ................................ |

(घ) रक्षिता — ..............................

(ङ) आगम्यते — ..............................

(च) प्रतिगृह्यताम् — ..............................

(छ) संवृत्तम् — ..............................

(ज) अभ्यवपत्तुम् — ..............................

(झ) परिष्वज्य — ..............................

(ञ) भवितव्यम् — ..............................

**9. क्त्वा – प्रत्ययं संयोज्य द्वयोः वाक्ययोः स्थाने एकं वाक्यं लिख्यताम्–**

**यथा – अहं पुस्तकं पठामि, अहं गृहं गमिष्यामि।**

**उत्तरम् – अहं पुस्तकं पठित्वा गृहं गमिष्यामि।**

(क) सः राजगृहं गच्छति, सः नृपं द्रक्ष्यति।

(ख) अहं कार्यं करोमि, अहं विश्रामं करिष्यामि।

(ग) सः चलचित्रं पश्यति, सः गृहं गमिष्यति।

(घ) सा दानं ददाति, सा जलं पास्यति।

(ङ) सः कन्दुकेन क्रीडति, सः पाठं पठिष्यति।

**10. निम्नलिखितेषु वाक्येषु कोष्ठाङ्कितानां पदानाम् उचितविभक्तौ प्रयोगः क्रियताम् –**

(क) वासवदत्ता .................... उदयनस्य भार्या आसीत्। (राजन्)

(ख) .................... तपोवने जन्तवः निर्भयाः आसन्। (तत्)

(ग) सः .......................... स्थानात् आगतः ? (किम्)

(घ) सः स्व ...................... स्मरणं करोति ? (पितृ)

(ङ) तत्र अति ...................... व्यसनं संवृत्तम् । (दारुण)